109.8 (7b–5) **पृथग्जनो वा द्विविध** इति । **आभ्यन्तरकश्च बाह्यकश्च । असमुच्छिन्नकुशलमूल**
109.9 (7b–6) आभ्यन्तरको बौद्धसंगृहीतत्वात् । **समुच्छिन्नकुशलमूलस्तु** बाह्यकस्तद्विपर्ययात् ।
अत एव च बाह्यमिति विशेषणं । इतरथा हि पृथग्जनपक्षावस्थितं वदामीत्येवाव-
109.11 (7b–7) क्ष्यत् । **उक्तं च सूत्र**[1] इति । अथ भगवतो ऽचिराभिसंबुद्धस्यैतदभवत् । अधिगतो मे धर्मो
गम्भीरो गम्भीरावभासः दुर्दर्शो दुरवबोधः अतर्क्यो ऽतर्कावचरः सूक्ष्मो निपुणः पण्डितवि-
ज्ञवेदनीयः । तं चाहं परेषामावेदयेयं । तं च परे न विजानीयुः । स मम स्याद्विघातः । स्या-
त्क्लमथः । स्याच्चेतसो ऽनुदयः । यन्न्वहमेकाकी अरण्ये प्रवणे दृष्टधर्मसुखविहारतायोगम-
नुयुक्तो विहरेयं ॥ अथ ब्रह्मणः सहापतेर्ब्रह्मलोके स्थितस्यैतदभवत् । नश्यति बतायं
लोकः । प्रणश्यति बतायं लोकः । यत्रेदानीं कदाचित्कर्हिचित्तथागता अर्हन्तः सम्यक्सं-
बुद्धा लोके उत्पद्यन्ते । तद्यथा उडुम्बरपुष्पं । तस्य चाद्य भगवतो ऽल्पोत्सुकविहारता-
यां चित्तं क्रामति । न धर्मदेशनायां । यन्न्वहं गत्वाध्येषयेयं । अथ ब्रह्मा सहापतिः तद्यथा
बलवान् पुरुषः सम्मिञ्जितं बाहुं प्रसारयेत् । प्रसारितं वा सम्मिञ्जयेत् । एवमेव ब्रह्मा
सहापतिः ब्रह्मलोके ऽन्तर्हितो भगवतः पुरस्तात् प्रत्यस्थात् । अथ ब्रह्मा तस्यां
वेलायां गाथामभाषत ।

प्रादुर्बभूव मगधेषु पूर्वं
धर्मो ह्यशुद्धः समलानुबद्धः ।
अपावृणोष्व अमृतस्य द्वारं
वदस्व धर्मं विरजं[2] निरङ्गणं[3] ॥

अथ भगवान् तस्यां वेलायामिमे गाथे अभाषत् ।

---

1 Cf. 根本說一切有部毘奈耶破僧事 (寒三 23^b 18 以下), Vinaya-piṭaka (Mahāvagga) I, 4 l. 32 et seq., Lalita-vistara (Lefmann) 392 l. 8 et seq. 2 °रजो MSS. 3 °गनं MSS.



कृच्छ्रेण मे अधिगतो ब्रह्मन् खिलां प्रविदाल्य[1]
भवरागपरीतैश्च नायं धर्मः सुसंबुधः[2] ।
प्रतिस्रोतोपमं मार्गं गभीरमतिदुर्दृशं
न द्रक्ष्यन्ते रागरक्तास्तमःस्कन्धेन चावृताः ॥

ब्रह्मावोचत् । **सन्ति** भदन्त **सत्त्वा लोके जाता लोके वृद्धास्तीक्ष्णेन्द्रिया अपि** 109.11 (7b–8)
**मध्येन्द्रिया अपि मृद्विन्द्रिया अपीत्यप्रवर्तिते एव धर्मचक्र** इति विस्तरः ॥
इन्द्रियाणि श्रद्धादीनि । यैः ते भव्या उक्ताः । यस्मादप्रवर्तिते ऽपि धर्मचक्रे सन्ति ती-
क्ष्णेन्द्रिया इत्याद्युक्तं । **तस्मात्सन्त्येव सास्रवाणि श्रद्धादीनीति ॥ सदेवकाल्लोका-** 109.14, 18. (7b–9, 10)
**द्**इति विस्तरः । न तावदहमस्मात्सदेवकाल्लोकात्समारकात्सब्रह्मकात्सश्रमणब्राह्म-
णिकायाः प्रजायाः सदेवमानुषाया मुक्तो निःसृतो विसंयुक्तो विप्रयुक्तो विपर्यासाप-
गतेन चेतसा बहुलं व्यहार्षमिति[3] विस्तरवचनं । **न चानास्रवाणामेषं[4] परीक्षा-** 109.19 (8a–1)
**प्रकार** इति । न ह्यनास्रवाणां आस्वाद आदीनवो निःसरणं वा युज्यते ॥ ६ ॥
**अर्हन्**निति । नानागामी क्लेशाविमुक्तसंतानत्वात् । **ऋद्धिमान्**निति प्राप्ताभिज्ञः । 110.10 (8a–9)
**चेतोवशित्वं प्राप्त** इति असमयविमुक्तः ॥ **जीवितपरिष्कारान्**निति । जीविताय परि- 110.12 (8a–10)
ष्कारस्तदनुगुणत्वात् । **दत्त्वा तत्प्रणिधायेति** । तदायुः प्रणिधाय चेतसिकृत्वेत्यर्थः । 110.13 (8b–1)
कथमित्याह । यन्मे भोगविपाकं कर्म[5] । तदायुर्विपाकं भवत्विति ॥ **प्रान्तकोटिक-**
**म्**इति ।

वृद्धिकाष्ठागतम्[6]

इति[7] लक्षणमस्य वक्ष्यते । **चित्तमुत्पादयति वाचं च भाषत** इति । चित्तवाचावपि

---

1 Sic MSS. contra metrum ? विदालिय. 2 °संबोधः MSS. contra metrum; cf. Vinayapiṭaka I, 5, 9. 3 व्यवहार्षमि NT, °हर्षमि C. གནས་པར་མི་འགྱུར་རོ་. 4 °मेव NC. འདི་. 5 Om. all MSS. and Tib. But see below. 6 °द्धिकोष्ठा N, °द्धिकोष्टा T, °द्धिकाष्ठा C. འཕེལ་བའི་རབ་ཏུ. 7 Kārikā VII, 46^c.

तत्सिद्धये कुर्यात्। नैककारणसाध्यं हि कार्यं। तदनेन विपाक एव जीवितेन्द्रियमिति
110.14 (8b–2) दर्शयति। यन्मे[1] भोगविपाकं कर्म[2]। तदायुर्विपाकदायि भवत्विति। ध्यानभावना-
110.18 (8b–3) बलं तु तस्याकर्षकमिति॥ विपाकोच्छेषं विपाचयत[3] इति। अकालमरणेनापरिसमा-
111.2 (8b–4) प्तफलस्य त्यक्तस्य जन्मान्तरकर्मणो भावनाबलेन विपाकोच्छेषमाकृष्य प्रति-
111.13 (9a–2) संवेदयते॥ तेषां तादृश इति। तेषां योगिनां पूर्वकर्मजं स्थितिकालावेधमिति।
पूर्वस्मिञ्जन्मनि कर्म पूर्वकर्म। ततो जातः पूर्वकर्मजः। स्थितिरिन्द्रियमहाभूतानां
प्रवाहः। स्थितेः कालः स्थितिकालः। तस्यावेध आक्षेपः। स्थितिकालावेधस्ताव-
त्संसारक्षणानुबन्धसामर्थ्यमाक्षेपः[4]। तेन ह्यसौ स्थितिकाल आविध्यते। तं पूर्वकर्मजं
111.14 (9a–3) स्थितिकालावेधमिन्द्रियमहाभूतानां व्यावर्तयन्ति योगिनः। अपूर्वं च समाधिज-
मागन्तुकमाक्षिपन्ति॥

111.17 (9a–5) प्रश्नात्प्रश्नान्तरमुपजायत इति। अथ यदर्हन्भिक्षुरायुःसंस्कारान्स्थापयति तज्जी-
वितेन्द्रियं कस्य विपाक इति[5] अस्मात्प्रश्नात्किमर्थमायुःसंस्कारानधितिष्ठन्तीति
111.18 (9a–6) प्रश्नान्तरं। परार्हितार्थं शासनस्थित्यर्थं चेति। परहितार्थं बुद्धा भगवन्तः। शा-
112.1 (9a–8) सनस्थित्यर्थमेव श्रावकाः॥ रोगादिभूतं[6] चात्मभावमिति। रोगगण्डशल्यादिभूतं त्रि-
112.7 (9b–2) दुःखतायोगात्॥ क्व कस्य चेति। क्वेत्यस्य प्रश्नविसर्जनं मनुष्येष्वेव त्रिषु द्वीपेष्वि-
112.9 (9b–3) ति। कस्येत्यस्य विसर्जनं स्त्रीपुरुषयोरसमयविमुक्तस्यार्हतः प्रान्तकोटिध्यानला-
112.11 (9b–4) भिन इति। तस्य हीति विस्तरः। समाधौ च वशित्वं प्रान्तकोटिकध्यानलाभिनः
तीक्ष्णेन्द्रियत्वात्। क्लेशैश्चानुपस्तब्धा संततिर्निरवशेषक्लेशप्रहाणात्। दृष्टिप्राप्तस्य
यद्यपि समाधौ वशित्वमस्ति। न तु तस्य क्लेशैरनुपस्तब्धा संततिः। समयविमुक्तस्य

---

1 यद्धि MSS. corrected by the Tibetan version of the Kośa-bhāṣyam བདག་གི་···གང་ཡིན་པ་. 2 °स्त NT, त्त C. དེ་. Cf. above 17, 16. 3 °पच्यत All MSS. རྣམ་པར་སྨིན་པར་བྱེད་. 4 MSS. संस्कार°, but Tib. འཁོར་བའི་···. 5 論 三 8ᵃ 7, 8. 6 °गाभिभू° MSS. ནད་ལ་སོགས་པར་གྱུར་པ་.



यद्यपि क्लेशैरनुपस्तब्धा संततिः न तु समाधौ वशित्वम्। असमयविमुक्तस्य तूभयम-
स्ति॥ बहुवचनमिति। जीवितसंस्कारानिति यद्वचनं। तद्बहुवचनं। कस्मादित्याह। 113.1 (9b–8)
बहूनामिति विस्तरः। बहूनां संतानवर्तिनां जीवितसंस्काराणामुत्सर्जनाधिष्ठा-
नात्। न ह्येकस्य क्षणस्य उत्सर्जने ऽधिष्ठाने वा प्रयोजनमस्ति। प्रवाहेण पर-
कार्याभि[1]निष्पादनात्। एकस्य च क्षणस्यापीडाकरत्वात्॥ न च कालान्तरस्थावरमि- 113.4 (9b–9)
ति। कालान्तरस्थानशीलं कालान्तरस्थावरं अक्षणिकं। तच्चैतदायुर्द्रव्यं न भवतीति 113.6 (9b–10)
द्योतनार्थं बहुवचनमित्येके॥ बहुष्वेव संस्कारेष्विति सौत्रान्तिकानामयं पक्षः।
एकस्मिन्नपि क्षणे बहवस्ते संस्कारा येष्वायुरिति प्रज्ञप्तिः नैकमायुर्नाम द्रव्यम-
स्ति। ते च संस्काराः पञ्चस्कन्धस्वभावाश्चतुःस्कन्धस्वभावा वा द्रष्टव्याः। अन्यथा 113.6 (10a–1)
हि नैव संस्कारग्रहणमकरिष्यत। एवं तु वक्तव्यमभविष्यत् भगवान् जीवि-
तान्यधिष्ठाय आयूंषि उत्सृष्टवानिति॥ मरणवशित्वज्ञापनार्थमिति। मरणे वशि- 113.9 (10a–2)
त्वमस्तीति॥ त्रैमास्यमेव नोर्ध्वमिति। त्रयो मासाः समाहृतास्त्रिमासं। त्रिमा- 113.10 (10a–3)
समेव त्रैमास्यं॥ अत्र कालाध्वनोरत्यन्तसंयोगे[2] द्वितीया भवति नोर्ध्वं त्रैमास्या-
द्विनेयकार्याभावात्। सुभद्रावसानत्वात् बुद्धकार्यस्य॥ तस्यापि संपादनार्थमि- 113.11 (10a–4)
ति। प्रतिज्ञातसंपादनार्थम्। अन्यथा वचनमात्रं स्यादिति। कल्पावशेषः[3] कल्प 13.13 (110a–5)
एकः सकलः। कल्पाधिकः कल्पः सातिरेक इत्यर्थः[3]॥ स्कन्धमरणमारयोरिति। 113.14 (10a–6)

---

1 S. MSS. གཞན་གྱི་དོན་ and Sde-dge edition reads simply: དོན་? परार्थ° or अर्थ°

2 Pāṇini 2, 3, 5. 3 . . . 3 Sic MSS. བསྐལ་པ་ལས་ལྷག་པ་ཞེས་བྱ་བ་ལ། བསྐལ་པ་ནི་བསྐལ་པ་གཅིག་རྫོགས་པ་ཡིན་ནོ། །བསྐལ་པ་བས་(?ལས་)ལྷག་པ་ནི་བསྐལ་པ་བས་(?ལས་)ལྷག་པ་ཡིན་ཏེ། བསྐལ་པ་བས་(?ལས་)ཐལ་བ་ཞེས་བྱ་བའི་ཐ་ཚིག་གོ། According to Tib. perhaps to read: kalpâvaśeṣa iti. kalpa eka-kalpaḥ sakalaḥ. kalpâvaśeṣaḥ kalpâdhikaḥ. kalpaḥ sâtireka ity arthaḥ. And Tibetan version has here the equivalent of तस्यापि संपादनार्थमिति। प्रतिज्ञातसंपादनार्थम्। अन्यथा वचनमात्रं स्यादिति॥

चत्वारो माराः। देवपुत्रमारः क्लेशमारः स्कन्धमारः मरणमारश्च। तत्र प्रथमे यामे
113.16 (10a–7) **देवपुत्रमारो निर्जितः**। द्वितीये यामे दिव्येन चक्षुषा लोकं व्यवलोक्य। तृतीये यामे **क्लेशमारो निर्जितः**। वैशाल्यां तु त्रैमास्यं जीवितसंस्कारानधिष्ठाय आयुःसंस्कारानुत्सृष्टवान्। स्कन्धमारनिर्जयार्थमुत्सृष्टाः स्कन्धाः। तेषूत्सृष्टेषु मर्तव्यं स्यात्। अतो मरणमारनिर्जयार्थमधिष्ठिता इति वैभाषिकाः॥ **निष्ठितमानुषाङ्गिकं** यत्प्रश्नात्प्रश्नान्तरमुपजातं॥

110.3 (8a–6)

**द्वेधा[1] द्वादश**

इति। द्वेधैव द्वादश एवेत्यवधार्यते।

110.4 (8a–5)

**अतेऽष्टकाच्**

श्रद्धादिकादाज्ञातावीन्द्रियपर्यन्तात्।

**दौर्मनस्याच्च।**

113.20 (10a–9) **जीवितेन्द्रियादे**कान्तविपाकात्। **अन्यानि द्वादशेन्द्रियाणि** विपाकश्चाविपाकश्च॥
114.2 (10a–10) **तत्र चक्षुरादीनि** पुरुषेन्द्रियावसानानि **सप्त** स्वप्राप्त्यभिनिर्वृत्तानि **औपचयिकानि**
114.5 (10b–1) **अविपाकः। मनोदुःखसुखानीति** विस्तरः। यानि मनआदीनि **कुशलक्लिष्टानि। तानि अविपाकः। यानि च यथायोगमैर्यापथिकशैल्पस्थानिकनैर्माणिकस्वभावानि अव्याकृतानि। तानि अविपाकः।** यथायोगमिति विशेषणं ऐर्यापथिकादीनां मानसत्वेन दुःखेन्द्रियासंभवात्सुखसौमनस्ययोश्च क्वचिदसंभवात्। तत्र कामधातावैर्यापथिकं मनइन्द्रियं तत्संप्रयुक्ते च सौमनस्योपेक्षेन्द्रिये अविपाकः। रूपधातावैर्यापथिकं मनइन्द्रियमविपाकः। वेदनेन्द्रियं च तत्संप्रयुक्तं यथाभूमि। नैर्माणिकं पञ्चभूमिकं। तत्र

---

1 द्वेधा MSS. གཉིས་.



चोपेक्षेन्द्रियमेवाविपाकः। ऐर्यापथिकशैल्पस्थानिकनैर्माणिकानि नित्यमुपेक्षेन्द्रियेण संप्रयुक्तानीति भदन्तानन्तवर्मा[1]। **शेषाणि विपाक** इति। कुशलक्लिष्टैर्यापथिकशैल्पस्थानिकनैर्माणिकस्वभावेभ्यो मनइन्द्रियादिभ्योऽन्यानि मनइन्द्रियादीनि विपाकजानि विपाकः। **शेषाण्यविपाक इति सिद्धमिति**। जीवितेन्द्रियं द्वादश चक्षुरादीनि हित्वा तदवधारणादेव शेषाण्यविपाक इति सिद्धं। कतमानि पुनस्तानि। दौर्मनस्येन्द्रियं न विपाकः कुशलाकुशलत्वात्। तथा हि वक्ष्यति।

तत्रैकं सविपाकम्

इति[2]॥ श्रद्धादि

अष्टकं कुशलम्

इति[3] अविपाकः।

विपाको ऽव्याकृतो धर्मः सत्त्वाख्य

इति[4] विपाकलक्षणाभावात्॥

**यदि दौर्मनस्येन्द्रियं न विपाक** इति। अनेनागमविरोधं दर्शयति॥ **संप्रयोगवेद**- 114.13 (10b–4)
**नीयतामधिकृत्येति**। वेदनीयं वेदना। दौर्मनस्यं वेदनीयमस्मिन्निति दौर्मनस्यवेदनीयं कर्म[5]॥ **सौमनस्योपेक्षावेदनीये अपीति**। संप्रयोगमात्रवचनाद्दौर्मनस्यवत् सौमनस्योपेक्षे 114.17 (10b–6)
अपि न विपाकः प्राप्नुत इति परस्याभिप्रायः॥ **संप्रयोगे ऽपि न दोषो विपाके** 114.19 (10b–7)
**ऽपीति**। सौमनस्यं वेदनीयं अस्मिन्सौमनस्यवेदनीयं कर्म। तथा सौमनस्यं विपाकत्वेन वेदनीयमस्य सौमनस्यवेदनीयं कर्मेति॥ **अगत्या ह्येतदेवं गम्येतेति**। यदि दौर्मनस्यं युक्त्या परिच्छिन्नं न विपाक इति। तत एवमगत्याख्यायेत संप्रयोगवेदनीयतामधिकृत्योक्तमिति। तेनाह। **का पुनरत्र युक्तिर्दौर्मनस्यं न विपाक** इति। अथ वा अग- 115.1 (10b–8)
त्या ह्येतदेवं गम्येत क्वचित्संप्रयोगवेदनीयता क्वचिद्विपाकवेदनीयतेति। ब्रूयास्त्वं सर्व-

---

1 भदंतानंतधर्मा MSS. བཙུན་པ་གོ་ཆ་མཐའ་ཡས་.  2 Kārikā II, 11ª.

3 Kārikā II, 12ª.  4 Kārikā II, 58ªᵇ.  5 कः MSS. ལས་སོ་

त्रैव तर्हि संप्रयोगवेदनीयतेति। अत एतदन्तराभिप्रायमभिसमीक्ष्याह। का पुनरत्र युक्ति-
र्दौर्मनस्यं न विपाक इति। **दौर्मनस्यं ह्यीति**। अनिष्टचिन्तनादिकैः **परिकल्पविशेषै-**
115.4 (10b–9) **रुत्पाद्यते च** [व्युत्पाद्यते च][1] **व्युपशाम्यते च। सौमनस्यमप्येवमिति**। परिकल्प-
115.10 (11a–3) विशेषैरिष्टचिन्तनादिभिरुत्पाद्यते च व्युपशाम्यते च ॥ **वीतरागादीनां तद्धी**ति।
यस्माद्वीतरागादीनां **दौर्मनस्यं व्यावर्तते**। **न हि** चक्षुरादिको **विपाकभूतो** वीतरागा-
दीनां व्यावर्तते। दौर्मनस्यं तु व्यावर्तते। वचनात् दौर्मनस्येन कामवीतरागो ऽसम-
न्वागत इति[2]। सूत्रे ऽप्युक्तं। अवीतरागस्य द्विशल्या वेदनोक्ता कायिकं दुःखं प्रतिसं-
वेदयते चैतसिकं च दौर्मनस्यमिति वचनात्। वीतरागस्य च एकशल्या कायिकमेव
115.12 (11a–4) दुःखं प्रतिसंवेदयत इति ॥ **सौमनस्यमप्येषामिति** विस्तरः। वीतरागाणामव्याकृतं
विपाकरूपं सौमनस्यं कीदृशं स्यात्। समापत्तिसंगृहीतं तेषां सौमनस्यं संभवति। तच्च
115.13 (11a–5) कुशलत्वान्न विपाकः। अतो वक्तव्यं **कीदृशं** तेषां सौमनस्यं **विपाक** इति। **यादृशं**
115.14 (11a–6) **तादृशमस्त्विति**। अपरिच्छिद्यमानमपि तदस्त्येवेति दर्शयति। **तस्यास्ति विपाकाव-**
**काशो न दौर्मनस्यस्य। सर्वथाप्यसमुदाचारात्**समापत्त्यवस्थायामप्यसमापत्त्यवस्था-
115.16, 19, (11a–7, 8) यामपीत्यतो **न विपाक** इति सिद्धं ॥ **मनइन्द्रियमुभयोरुभयस्येति**। उभयोः सुग-
तिदुर्गत्योः। उभयस्य कुशलाकुशलस्य। विपाक इत्यधिकारः ॥ इदमुत्सृष्टं जीवि-
तेन्द्रियाष्टमानि सुगतौ कुशलस्य विपाक इति[3]। तत्र कथमुभयव्यञ्जनं असाधुसम्मतं
116.3 (11a–10) कुशलस्य विपाक इत्याह। **सुगतावुभयव्यञ्जनस्याकुशलेन तत्स्थानप्रतिलम्भ**
इति। स्थानमस्य भ्रष्टमतो ऽस्याकुशलेन प्रतिलम्भो विप्रयुक्तो धर्मः। उभयं तु
व्यञ्जनं कुशलस्यैव विपाक इत्यभिप्रायः ॥

110.5 (11b–3)

## तत्त्वेकं सविपाकम्

116.8 (11b–5) इति। तदेकं सविपाकमेवेत्यर्थः। तेनाह। **तुशब्द एवकारार्थो भिन्नक्रमश्चेति**। भि-

1 Sic MSS. To be left out as Tib. 2 論 三 17ᵃ 6. 3 論 三 11ᵃ 7.



न्नस्थान इत्यर्थः। तदेकं सविपाकं त्विति हि क्रमो न भिन्नः स्यात्। श्लोकबन्धानुगुण्येन
त्वेवमुक्तं। **न हि तदव्याकृतमिति**। सविपाकमेवेत्यवधारणे युक्तिं दर्शयति। द्वे हि 116.10 (11b–7)
वस्तुनी अविपाके इष्येते[1]। अव्याकृतमनास्रवं च। विकल्पविशेषोत्पाद्यत्वान्न **तद-**
**व्याकृतं। असमाहितत्वाच्च नानास्रवं**। अव्याकृतं हि पूतिबीजवन्न विपाकदानाय
समर्थं। अनास्रवं तु तृष्णानभिष्यन्दितत्वान्नालं विपाकदानायानभिष्यन्दितसारबीजवत्।
पारिशेष्यादकुशलं वा तद्भवेत्कुशलसास्रवं वा। अतः सविपाकमेव नास्त्यविपाकं
दौर्मनस्यं ॥ १० ॥

110.6 (11b–4)

## दश द्विधा

इति। दशैव द्विधा। द्विधैव च दशेत्यवधारणं। **द्विधेति सविपाकाविपाकानि**।

116.15 (11b–8)

## मनो ऽन्यवित्तिश्रद्धादीनि च

इति। मनश्च अन्यवित्तयश्च श्रद्धादीनि चेति। वित्तिर्वेदना। **अन्यग्रहणेन दौर्मनस्य-** 117.1 (11b–10)
**वर्जितं गृह्यते** दौर्मनस्यस्योक्तत्वात्। **श्रद्धादीनि श्रद्धावीर्यस्मृतिसमाधिप्रज्ञाः**।
गृह्यन्त इति अधिकृतं ॥ **अन्यदविपाकमिति**। यथोक्तदौर्मनस्याद्यवधारणात् जीवितं 117.11 (12a–2)
रूपाणि च सप्तेन्द्रियाणि आज्ञास्यामीन्द्रियादीनि च त्रीण्यविपाकानीति **सिद्धं**।
अव्याकृतत्वात् अनास्रवत्वाच्च यथाक्रमं ॥

116.16 (12a–5)

## अष्टकं कुशलम्

इत्यष्टकं कुशलमेवेत्यवधारणं ॥

## द्विधा दौर्मनस्यम्

इति। द्विधैव दौर्मनस्यं दौर्मनस्यमेव च द्विधेति अवधारणं। **द्विधेति कुशलं चाकु-** 117.15 (12a–8)
**शलं च**। अन्यदपि द्वैधमस्ति। कुशलं चाव्याकृतं च। अकुशलं चाव्याकृतं चेति।

1 इष्यते MSS.

तत्कथमिदमवधार्यते कुशलं चाकुशलं चेति । व्याख्यानतो विशेषप्रतिपत्तिः । अथ वा दौर्मनस्यं सविपाकमेवेति निर्धारितं । तस्मादिदमेव द्वैधं भवति नान्यत् ॥

116.17 (12a–5)

**अन्या च वित्तिर्**

इति । दौर्मनस्यवर्ज्यं वेदनाचतुष्टयं तस्योक्तत्वात् ।

**त्रेधा**[1]

इति । कुशलाकुशलाव्याकृतानि । त्रयः प्रकारास्त्रेधा । द्वित्र्योश्च धमुञ् एधाच्चेति[2] त्रेधेत्येधाशब्दव्युत्पत्तिः । अलोभादिसंप्रयुक्तानि कुशलानि । लोभादिसंप्रयुक्तानि अकुशलानि । अतो ऽन्यान्यव्याकृतानि ।

**अन्यदेकधा**

117.18 (12a–9) इति । **जीविताद्यममन्यदेकधैवेत्यवधार्यते । अव्याकृतमेवेत्यर्थः** । एतदर्थं च पुनरस्य करणं । अन्यथा ह्यकुशलमेव कुशलाव्याकृतमेवाकुशलाव्याकृतमेव वा तत्संभाव्यते । तस्मादभीप्सितैकधात्वप्रसिद्ध्यर्थं पुनरुच्यते । यस्यैकधात्वं संभवति तद्भवति । किं च संभवत्यव्याकृतत्वमिति ॥ ११ ॥

118.1 (12b–1)

**कामाप्तममलं द्विधा**

118.7 (12b–3) इति । अमलमेव द्विधा कामाप्तं भवति । **तद्धयप्रतिसंयुक्तमेवेति**[3] अधातुपतितमेवेत्यर्थः ॥

118.2, 3 (12b–1)

**रूपाप्तं स्त्रीपुमिन्द्रिये**

1 त्रिधेति MSS. 2 Simply एधा MSS. See Pāṇini 5, 3, 45 & 46.

3 तेद्यप्र° N, तद्यप्रतिसंप्रयु C, तध्यप्रतिसंप्रयु T. དེ་ནི་དེ་ལྡན་པ་མ་ཡིན་པ་



इति विस्तरः । स्त्री च पुमांश्च स्त्रीपुमांसौ । समासान्ते[1] विधिरनित्य इति परिभाषया समासान्तो न भवति । तयोरिन्द्रिये स्त्रीपुमिन्द्रिये ॥

**दुःखे च**

इति । दुःखवेदनास्वभावे इन्द्रिये **दुःखदौर्मनस्ये** इत्यर्थः । ते स्त्रीपुमिन्द्रिये दुःखदौर्मनस्ये अमलं चेद्धानुवर्तमानं द्विधा । शेषं रूपाप्तमिन्द्रियं भवति ॥ **क्वोच्यत** इति पृष्टे 118.13 (12b–7)
सूत्रं दर्शयति । **अस्थानमनवकाश** इति विस्तरः । अत्र सूत्र इत्यभिप्रायः ॥ **अन्यः** 118.16 (12b–8)
**पुरुषभावो ऽस्ति यः कामधातौ पुरुषाणां भवतीति** । स्तनादिसंस्थानस्वराचारान्यथात्वं ॥ **दुःखेन्द्रियं नास्तीति आश्रयस्याच्छत्वात्** तदभिघातजं नास्ति । **अकुश-** 118.17 (12b–9)
**लाभावाच्च** विपाकजं च नास्ति ॥ **दौर्मनस्येन्द्रियं नास्ति शमथस्निग्धसंतानत्वा-** 119.1 (12b–10)
**दिति** । यस्माच्च शमथेन समाधिना प्रतिघविगमात् रौक्ष्यं संताने नास्ति । तस्माद्दौर्मनस्येन्द्रियं नास्ति । **आघातवस्त्वभावाच्चेति** । आघातः कोपः । तस्य वस्तु विषयः आघातवस्तु । नव चाघातवस्तूनि । अनर्थं मे अकार्षीत् करोति करिष्यति चेत्याघातवस्तुत्रयं । मित्रस्य मे अनर्थमकार्षीत् करोति करिष्यति अपरमाघातवस्तुत्रयं । अमित्रस्य मे अर्थमकार्षीत् करोति करिष्यति चेत्यपरमाघातवस्तुत्रयम् । इत्येषां नवानामाघातवस्तूनामभावात् विषयकृतमपि दौर्मनस्यं नास्ति । न केवलं हेतुकृतं नास्तीति दर्शयति । हेतुकृतं हि तद्यतस्वसंतानप्रतिघकृतं । प्रत्ययकृतं च तद्यन्नवाघातवस्तुकृतमिति ॥

**सुखे चापोह्य रूपि च** 118.4 (12b–2)

इति । चशब्देन पूर्वोक्तमनुकृष्यते । तेनाह । **स्त्रीपुमिन्द्रिये दुःखे च अमलं च** 119.3 (13a–1)
**द्विधेति वर्तत** इति ।

**सुखे**

इति । सुखवेदनास्वभावे सुखसौमनस्येन्द्रिये । रूपीन्द्रियं चक्षुरादि ॥ १२ ॥

1 °न्तो MSS.

119.13 (13a–7) **वित्तित्रयं सुखसौमनस्योपेक्षा** इति । सुखेन्द्रियं यत्तृतीयध्यानभूमिकं दर्शन-
हेयानुशयसंप्रयुक्तं तद्दर्शनहेयं तत्रैव । अतो ऽन्यत्सास्रवं पञ्चविज्ञानकायिकं च कामा-
वचरं प्रथमध्यानभूमिकं च त्रिविज्ञानकायिकं भावनाप्रहातव्यं । अनास्रवं तु सुखेन्द्रि-
यमहेयं । सौमनस्यं दर्शनहेयसंप्रयुक्तं दर्शनहेयं । अतो ऽन्यत्सास्रवं भावनाहेयं ।
अनास्रवमहेयं । उपेक्षेन्द्रियं तु सर्वगमिति सुगमं ॥

119.10 (13a–5) **द्विहेया दुर्मनस्कता**[1]

इति । दौर्मनस्ययोगाद्दुर्मनस्कः । तद्भावो दुर्मनस्कता । दौर्मनस्यमित्यर्थः । यस्य
गुणस्य हि भावाद्द्रव्ये शब्दनिवेशः । तदभिधाने त्वतलाविति[2] लक्षणात् । तद्दर्श-
नहेयसंप्रयुक्तं दर्शनहेयम् । अतो ऽन्यद्भावनाहेयं । नाहेयं असमाहितत्वात् ॥ १३ ॥

120.9 (13b–3) **कामेष्वादौ विपाकौ द्वे लभ्येते**

इति । कामप्रधानत्वात् कामधातुः काम इति निर्दिश्यत इति[3] वक्ष्यते । अण्ड-
जजरायुजसंस्वेदजैः सत्त्वैः कामधातावादौ प्रथमतो द्वे इन्द्रिये विपाकात्मके लभ्येते
**कायेन्द्रियं जीवितेन्द्रियं च** । कस्मात् । प्रतिसंधिकाले मनउपेक्षेन्द्रिययोरवश्यं
120.13 (13b–5) क्लिष्टत्वात् ।

उपपत्तिभवः क्लिष्टः सर्वक्लेशैः स्वभूमिकैर्

इति[4] वचनात् । चक्षुरादीनां च तस्यामवस्थायामविद्यमानत्वात् ॥

120.10 (13b–3) **नोपपादुकैर्**

इति अपवादः । अविशेषितत्वाद्धि उपपादुकैरपि तथैव द्वे एव लभ्येयातामिति

1 °स्कृते° MSS. ཡིད་མི་བདེ་.  2 तल् denotes a Taddhita-suffix ta (tā f.).

3 論 三 14ᵃ 1.  4 Kārikā III, 38ᵇᶜ.



प्रसङ्गः । तस्मादयं प्रतिषेधः । किमुपपादुकैस्ते द्वे नैव लभ्येते । लभ्येते न तु
द्वे एव । तेनाह

**तैः षड्वा**

इति विस्तरः । **षड्व्यञ्जना भवन्ति** षड्विद्यमानस्त्रीपुरुषेन्द्रियाः **यथा प्राथमक-** 121.2 (13b–7)
**ल्पिका** इति ।

युगाद्युत्पन्नाः प्रागासन् रूपिवत्सत्त्वा

इति[1] वचनात् । **कतमानि षट्** । **चक्षुरादीनि पञ्च जीवितं च** षष्ठमिति ॥ **यथा** 121.5 (13b–9)
**देवादिष्विति** । आदिशब्देन नारकादयो ऽपि गृह्यन्ते । अन्तराभवोपपत्तिभवप्रतिसंध्य-
वस्थायां तानि प्रथमतो लभ्यन्ते ॥ **किं पुनरुभयव्यञ्जना अप्युपपादुका भवन्तीति** । 121.6 (13b–10)
निह्रीनोभयव्यञ्जनोत्पत्तिः । विशिष्टा चोपपादुका योनिः । कथमनयोः समायोग इति
चोदनाभिप्रायः ॥ **रूपप्रधानत्वाद्रूपाणीति रूपधातुर्निर्दिश्यते** । रूपप्रधानत्वादिति 121.11 (14a–1)
रूपाणां स्वच्छत्वात् भास्वरत्वादित्यर्थः । अथ वा न कामगुणप्रधानो रूपधातुः । किं
तर्हि रूपमात्रप्रधानः । नाप्यारूप्यधातुवत् अरूपप्रधान इति । सूत्रे ऽप्युक्तमि- 121.12 (14a–2)
ति । सूत्रे ऽप्येवं दृष्टं न मदुपज्ञमेवैतदिति दर्शयति । ये ऽपि ते **शान्ता वि-**
**मोक्षा अतिक्रम्य रूपाण्यारूप्याः** । ते ऽप्यनित्या अध्रुवा अनाश्वासिका विपरि-
णामधर्माण इति विस्तरः । **अव्यञ्जनैरुपपादुकैरिति** प्राथमकल्पिकैः ॥ **समाप-** 121.16 (14a–3, 4)
**त्तितश्च परत्वादिति** । यस्मात्पूर्वं रूपसमापत्तिः पश्चादारूप्यसमापत्तिः । तस्माद्रूप-
धातोरुत्तर आरूप्यधातुः । **उपपत्तितश्च प्राधानतरत्वादिति** । यस्माच्चोपपत्तितः
प्रधानतरः रूपधातोरारूप्यधातुः । बहूनि कल्पसहस्राणि तत्रातिप्रशान्तो विपा-
को भवति । अतो ऽप्यसावुत्तरः । न तूपपत्तिदेशतः ।

आरूप्यधातुरस्थान

इति[2] वचनात् ॥ १४ ॥

1 Kārikā III, 96ᵃ.  2 K. III, 3ᵃ.

122.5 (14a–7) निरोधयत्युपरमन्

122.7 (14a–9) इति । म्रियमाण आरूप्यधातावेतान्येव त्रीणीन्द्रियाणि निरोधयति । साप-
वादं चैतद्वेदितव्यं ।

शुभे सर्वत्र पञ्च च

इति[1] वचनात् ॥

122.5 (14a–7) रूपे ऽष्टाव्

122.9 (14a–10) इति । रूपधातौ अष्टावेतान्येव । सह पञ्चभिश्चक्षुरादिभिर्निरोधयेत् । सकृत्समग्रे-
122.10 (14b–1) न्द्रियमरणात् । अत एवाह । सर्वे ह्युपपादुकाः समग्रेन्द्रिया उपपद्यन्ते म्रि-
यन्ते चेति ॥

122.6 (14a–7) कामे दश नवाष्ट वा

122.12 (14b–2) इति । उभयव्यञ्जनो दशेन्द्रियाणि निरोधयति यदि समग्रपञ्चेन्द्रियो भवति ।
122.13 (14b–3, 4) एकव्यञ्जनो नव । अव्यञ्जनो ऽष्टौ । यदि तु विकलेन्द्रियो ऽन्धो बधिरो वा
भवति । तदा तदिन्द्रियं परिहार्यं ॥ १५ ॥

सापवादं चैतत्सर्वकामधातावेव वेदितव्यं । तदपवादमाह ।

122.16 (14a–8) क्रममृत्योस्तु चत्वारि

123.5 (14b–6) इति ॥ न ह्येषां पृथङ्निरोध इति । न ह्येषां कामधातावन्योन्यं विरहय्य
निरोधो ऽस्तीत्यभिप्रायः ॥

122.17 (14a–8) शुभे सर्वत्र पञ्च च

इति । सर्वस्य पूर्वोक्तस्य मरणविधेर्

निरोधयत्युपरमन्नारूप्ये जीवितं मन

1 Kārikā II, 16d.



इति[1] एवमादेरपवादः । त्रिविधं हि मरणचित्तं संभवति । क्लिष्टमव्याकृतं कुशलं
च । तत्र क्लिष्टाव्याकृतचितस्योत्सर्गन्यायेन मरणविधिरुक्तः । कुशलचित्तस्य तु 123.8 (14b–7)
मरणे श्रद्धादयः पञ्चाधिकाः प्रक्षेप्तव्याः । एषां हि श्रद्धादीनां कुशले चेतसि
अवश्यं भावः । तेन यत्र त्रीण्युक्तानि तत्राष्टौ । यत्राष्टौ तत्र त्रयोदश । यत्र 123.10 (14b–9)
दश तत्र पञ्चदश । यत्र नव तत्र चतुर्दश[2] । यत्र पुनरष्टौ तत्र त्रयोदश । यत्र
चत्वारि तत्र नवेति विस्तरेण गणनीयं । रूपारूप्यधात्वोर्नास्ति क्रममरणं ॥ 123.12 (14b–10)

इन्द्रियप्रकरणे सर्व इन्द्रियधर्मा विचार्यन्त इति । इन्द्रियप्रकरणे इह क्रिय-
माणे सर्व इन्द्रियधर्मा इन्द्रियावस्थाविशेषाः कारित्रविशेषा वा विचार्यन्त इत्येके व्या-
चक्षते । अपरे तु व्याचक्षते । इन्द्रियप्रकरणे इन्द्रियस्कन्धके[3] सर्व इन्द्रियधर्मा अवस्था-
विशेषाः कारित्रविशेषा वा विचार्यन्ते । तेनेहापि ते विचार्यन्ते । तत्प्रत्यासत्त्वात्
अस्य शास्त्रस्येत्यभिप्रायः ॥

नवाप्तिरन्त्यफलयोर् 123.1 (15a–2)

इति । नवभिरिन्द्रियैराप्तिर्नवाप्तिः । कस्य । अन्त्यफलयोः । अन्ते[4] भवे अन्त्ये । अन्त्ये फले
अन्त्यफले । तयोः । के पुनरन्त्ये । स्रोतआपत्तिफलं अर्हत्त्वफलं च । यथा दण्डस्य 123.16 (15a–4)
द्वावन्तौ भवतः । एवं पङ्क्त्यवस्थितानां चतुर्णां फलानां स्रोतआपत्तिफलं अर्हत्त्वफलं चान्ते
भवतः । सकृदागामिफलं अनागामिफलं च मध्ये भवतः । तयोरन्त्ययोः फलयोर्नव- 123.17 (15a–5)
भिरेवेन्द्रियैः प्राप्तिः । कतमैर्नवभिरित्याह । श्रद्धादिभिराज्ञातावीन्द्रियवर्ज्यैर्मनउपे- 123.19 (15a–6)
क्षेन्द्रियाभ्यां चेति नवभिरिति ॥ तत्रैवमभिसमयक्रमः । दुःखे धर्मज्ञानक्षान्तिः । दुःखे
धर्मज्ञानं । दुःखेऽन्वयज्ञानक्षान्तिः । दुःखेऽन्वयज्ञानं । समुदये धर्मज्ञानक्षान्तिः । समुदये
धर्मज्ञानं । समुदयेऽन्वयज्ञानक्षान्तिः । समुदयेऽन्वयज्ञानं । निरोधे धर्मज्ञानक्षान्तिः । निरोधे

1 Kārikā II, 15ab. 2 °शी MSS. 3 發智論根蘊 (秋五 63a 9 et seq.). 4 अन्त्ये NT.

विहीयते। न चार्यो भवति प्रथमध्यानभूमिकपृथग्जनत्वप्राडुर्भावात्। एवमारूप्य-[1]
धातुसंचाराद्रूपावचरं पृथग्जनत्वं विहीयते। ऊर्ध्वभूमेश्चाधरां भूमिं संचरते। ऊर्ध्वभू-
168.5 (19b—10) मिकं पृथग्जनत्वं विहीयत इति वक्तव्यम्। **एवमन्येषामपि योज्यमिति**। यथा-
र्यमार्गस्य प्राप्त्या पृथग्जनत्वमप्राप्तिर्विहीयत इति योजितं। एवमन्येषामपि श्रुत-
चिन्तामयादिकानां धर्माणामप्राप्तिर्विहीयत इति योज्यं। कथं। कामावचराणां ता-
वच्छ्रुतचिन्तामयादिकानां धर्माणां प्राप्तिलाभादप्राप्तिर्विहीयते। उपपत्तिलाभिकानां
च कुशलानां प्राप्त्या समुच्छिन्नकुशलस्याप्राप्तिर्विहीयते। भूमिसंचाराच्च। यदा चायं
कामधातोश्च्युत्वा प्रथमं ध्यानमुपपत्त्या संचरति। तदा च तद्भूमिकानां गतिसं-
गृहीतानां स्कन्धानामप्राप्तिर्विहीयते। अक्लिष्टाव्याकृता एव हि गतयो वक्ष्यन्ते[2]।

अव्याकृताप्तिः सहजा

इति[3] चोक्तम्। एवं प्रथमध्यानभूमिकानां प्रायोगिकानां गुणानां प्राप्तेरप्राप्तिर्विही-
यते। भूमिसंचाराच्च। ऊर्ध्वभूमिकानां गतिसंगृहीतानां स्कन्धानां तद्भूमिसंचाराद्विही-
यत इति। इदमेकेषां भूमिसंचारव्याख्यानोदाहरणं। तत्र अविविक्तं पश्यामः।
ऊर्ध्वभूमिकानां गतिसंगृहीतानां स्कन्धानाम[4]प्राप्तिर्न केवलं भूमिसंचाराद्विहीयते।
किं तर्हि। तत्प्राप्तितो ऽपीति। इदं त्वसंकीर्णमुदाहरणं पश्यामः। तद्यथा द्वि-
तीयादिध्यानभूमिकानां प्रायोगिकानां गुणानां तदलाभिनः कामावचरस्य सत्त्वस्या-
प्राप्तिरस्ति। स यदि कामवैराग्यं कृत्वा प्रथमध्यान उपपद्यते। सा तेषामप्रा-
प्तिर्भूमिसंचाराद्विहीयते। प्रथमध्यानभूमिका तु तेषामप्राप्तिरुद्भवति। इत्येवमन्येषा-
मपि योज्यं॥

168.9 (20a—2) **ननु चैवमनवस्थाप्रसङ्गः प्राप्तीनामिति**। प्राप्तेरपि प्राप्तिः। अस्या अप्यन्या।
168.10 (20a—3) तस्या अप्यन्या इत्यनवस्था। **परस्परसमन्वागमादिति**। प्राप्तिप्राप्तियोगात्प्राप्त्या

1 एवना° MSS.; དེ་བཞིན་དུ་. 2 See 第論八 5b 6. 3 Kārikā II, 39c. 4 स्कन्धायतनानाम° MSS.; ཕུང་པོ་རྣམས་ཀྱི་.



समन्वागतः। प्राप्तियोगात्प्राप्तिप्राप्त्या समन्वागत इत्यर्थः। **प्राप्त्युत्पादादिति** वि- 168.12 (20a—4)
स्तरः। **प्राप्त्युत्पादात्तेन धर्मेण** चित्तेन वा **समन्वागतो भवति। प्राप्तिप्राप्त्या** 168.13 (20a—5)
**च समन्वागत** इति वर्तते। **प्राप्तिप्राप्त्युत्पत्तेः प्राप्त्यैव समन्वागतो भव-
तीति**। एवं प्राप्तिरुभयत्र व्याप्रियते। प्राप्तिप्राप्तिस्त्वेकत्रेति। **अतो नानवस्था**। 168.14 (20a—6)
**कुशलस्य क्लिष्टस्य चेति**। अनयोरग्रजपश्चात्कालजप्राप्तित्वाद्ग्रहणम्। अव्याकृ-
तस्य हि सहजैव प्राप्तिरिति। **द्वितीये क्षण** इति विस्तरः। द्वितीये क्षणे 168.15 (20a—7)
तस्य धर्मस्य तत्प्राप्तेः प्राप्तिप्राप्तेश्च प्राप्तय इति **तिस्रः प्राप्तयः**। प्राप्तियोगाद्धि
तैः समन्वागतो भवति। ताभिस्तिसृभिः प्राप्तिभिः समन्वागमार्थं **पुनस्तिस्रो** 168.17 (20a—8)
**ऽनुप्राप्तय उद्भवन्तीति षड्भवन्ति** प्राप्तयः। **प्रथमद्वितीयक्षणोत्पन्नानां द्रव्या-
णामिति**। धर्मेण सार्द्धं नवानां द्रव्याणां **नव प्राप्तयः सार्द्धमनुप्राप्तिभिरष्टादश** 168.19 (20a—9)
**भवन्ति। एवमुत्तरोत्तरवृद्धिप्रसङ्गेनेति** विस्तरः। उत्तरोत्तरस्य क्षणस्य वृद्धिः प्रा-
प्तिभिः। उत्तरोत्तरे वा क्षणे वृद्धिः प्राप्तीनां। तस्याः प्रसङ्गः उत्तरोत्तरवृद्धिप्रसङ्गः।
तेन। उत्तरोत्तरवृद्धिप्रसङ्गेन। **एताः प्राप्तयो विसर्पन्त्य** इति। दिङ्मात्रं दर्शयि-
ष्यामः। चतुर्थे क्षणे प्रथमक्षणोत्पन्नैस्त्रिभिर्धर्मैः प्राप्त्यनुप्राप्तिमद्भिर्भवितव्यं। द्वि-
तीयक्षणोत्पन्नाभिरपि षड्भिः प्राप्त्यनुप्राप्तिभिः पुनः प्राप्त्यनुप्राप्तिमतीभिर्भवितव्यम्।
एवं तृतीयक्षणोत्पन्नाभिरष्टादशभिः प्राप्त्यनुप्राप्तिभिः पुनरपि प्राप्त्यनुप्राप्तिमती-
भिर्भवितव्यमिति। प्रथमद्वितीयतृतीयक्षणोत्पन्नानां सप्तविंशतिः प्राप्तयः सार्द्धमनु-
प्राप्तिभिस्तावतीभिरिति चतुःपञ्चाशत्प्राप्तयश्चतुर्थे क्षणे भवन्ति। पञ्चमे तु क्षणे प्रथ-
मद्वितीयतृतीयक्षणोत्पन्नाः प्राप्त्यनुप्राप्तयः पुनश्चतुःपञ्चाशच्चतुर्थक्षणोत्पन्नप्राप्त्यनुप्रा-
प्तयश्च द्विश्चतुःपञ्चाशद्भवन्ति। त्रीणि चतुःपञ्चाशत्कानि द्वाषष्ट्युत्तरशतं प्राप्तीनां
जायते। एवमुत्तरोत्तरवृद्धिप्रसङ्गो वक्तव्यः। **अतीतानागतानामिति**। अत्र प्रत्यु- 169.2 (20a—10)
त्पन्नाग्रहणमनावश्यकत्वात्। **उत्पत्तिलाभिकानां चेति**। अत्र प्रायोगिकाग्रहणम-
नावश्यकत्वादेव। **ससंप्रयोगसहभुवामिति**। सवेदनादिसजात्यादीनाम्। **अनाद्यन्त-** 169.4 (20b—1)
**संसारपर्यापन्नानाम्**। अनादावनन्ते च संसारे संगृहीतानां। **अनन्ता** अप्रमेया

169.6 (20b–2) एकस्य प्राणिनः। किं अङ्ग बहूनां। **क्षणे क्षणे उपजायन्ते प्राप्तय** इति।
169.7 (20b–3) अनन्तद्रव्या एव[1]। अनन्तप्राप्तिद्रव्या इत्यर्थः। **अत्युत्सवो बतायं प्राप्तीनामि-**
**ति।** परिहासवचनमेतत्। **केवलं न प्रतिघातिन्यः** अरूपिणीत्वात् **यतो ऽवकाशं**
**लभन्ते** प्राप्तयः॥ ४० ॥

V. II. 3.
169.12 (1a–7)

## सभागता सत्त्वसाम्यम्

इति विस्तरः[2]। समानो भागो भजनमेषामिति सभागाः। तद्भावः सभागता। समा-
169.16 (1a–8) नो वा भागो भजनं सभागः[3]। सभाग एव सभागता। **यद्योगात्सभागो** भवति
**तद्द्रव्यं। सत्त्वानां साम्यं** सामान्यं सादृश्यमित्यर्थः। सत्त्वग्रहणमसत्त्वनिरासार्थं।
सत्त्वानां सत्त्वसंख्यातानां च धर्माणां सादृश्यं सभागता। असत्त्वसंख्यातानां शालियवादीनां नेष्यते। **निकायसभाग इत्यस्याः शास्त्रे संज्ञेति।** ज्ञानप्रस्थानादिके शास्त्रे निकायसभाग इति अनया संज्ञया अयं चित्तविप्रयुक्तो निर्दिश्यते। इह तु श्लोकबन्धानुगुण्यात्

## सभागता

170.1(1a–9,10) इति अनया संज्ञयेत्यभिप्रायः। **सा पुनरभिन्ना भिन्ना चेति।** या **सर्वसत्त्ववर्तिनी।**
सा प्रतिसत्त्वमन्यान्याप्यभिन्नेत्युच्यते सादृश्यात्। न हि सा यथा वैशेषिकाणामेका नित्या चेति। भिन्ना या[4] क्वचिद्वर्तते क्वचिन्न वर्तते। तत आह। **भिन्ना**
170.5 (1a–11) **पुनरिति** विस्तरः। **धातवस्त्रयः** कामादयः। **गतयः** पञ्च नरकादयः। **योनयश्च-**
170.6 (1b–1) **तस्रो** ऽण्डजादयः। **ज्ञातयो** ब्राह्मणादयः। **आदिशब्देन** उपासिकाभिक्षुणीनैवशैक्षना-
170.7 (1b–2) शैक्षादयः संगृह्यन्ते। **स्कन्धायतनधातुत** इति। रूपस्कन्धसभागता यावद्धर्मधातुसभा-
170.9–11 (1b–3, 4) गता। **अविशिष्टमिति।** सामान्यरूपं। **प्रज्ञप्तिश्चेति।** अभिधानं चेत्यर्थः। **एवं**

1 एवम् MSS. ཉིད་ 2 Om. Tib. 3 भागः MSS. སྐལ་པ་མཉམ་པའི་
4 या MSS. भिन्ना या = ཐ་དད་པ་ནི་ ··· གང་ཡིན་



**स्कन्धादिबुद्धिप्रज्ञप्तयो ऽपि योज्या** इति। यदि स्कन्धसभागताद्रव्यमविशिष्टं न स्यादन्योन्यविशेषभिन्नेषु स्कन्धेषु स्कन्धः स्कन्ध इत्यभेदेन बुद्धिर्न स्यात्प्रज्ञप्तिश्चेति। एवं धात्वादिबुद्धिप्रज्ञप्तयो ऽपि योज्या इत्येके पठन्ति। तेषामेवं वक्तव्यं। यदि सभागतेति विस्तरेण यावदन्योन्यविशेषभिन्नेषु धातुषु कामाव-
चरः कामावचर इति अभेदेन बुद्धिर्न स्यात्प्रज्ञप्तिश्चेति। **चतुःकोटिक** इति। 170.12–15 (1b–5)
**स्यात् च्यवेतोपपद्येत। न च सत्त्वसभागतां विजह्यान्न च प्रतिलभेतेति। सत्त्वसभागतामिति।** सत्त्वानां सभागता सत्त्वसभागता मनुष्यत्वादिलक्षणा। सत्त्वग्रहणं हि धर्मविशेषणार्थं। सत्त्वसभागता ह्यत्र चतुःकोटिके विवक्षिता न धर्मसभागतेति। न तु सत्त्वस्सत्त्व इत्याकारसभागतेहाभिप्रेता। यदि हि साभिप्रेता स्यात्। तृतीया कोटिर्न सिध्येत गतिसंचारे ऽपि[1] तस्याः सत्त्वसभागतायास्तादव-
स्थ्यात्। **तत्रैवोपपद्यमान** इति। तद्यथा मनुष्यगतेश्च्युत्वा मनुष्यगतावेवोपपद्यमानः। 170.15 (1b–6)
मनुष्यगतेश्च्यवते मरणादुपपद्यते च तस्यामेव प्रतिसंधिबन्धात्। न चासौ मनुष्यसभागतां विजहाति न च प्रतिलभते। तस्या मनुष्यसभागतायास्तादवस्थ्यात्।
**द्वितीया[2] नियाममवक्रामन्निति।** स **सत्त्वसभागतां** पृथग्जनत्वस्वभावां सभा- 170.16 (1b–6)
गतां **विजहाति। आर्यत्वस्वभावां सभागतामपरां प्रतिलभते। तृतीया गति-** 170.18 (1b–7)
**संचारादिति।** तद्यथा मनुष्यगतेश्च्युत्वा देवगतावुपपद्यमानः। च्यवते तथैव मरणादुपपद्यते च प्रतिसंधिबन्धात्। सत्त्वसभागतां मनुष्यसभागतालक्षणां विजहाति। प्रतिलभते च देवसभागतालक्षणामपरामिति। **चतुर्थ्येतानाकारान्स्थापयित्वेति।** पूर्वोक्तकोटिस्वभावप्रकारान्वर्जयित्वेत्यर्थः। तद्यथा जीवन् पृथग्जन आर्यो वा किंचिदलभमानः॥

**यदि पृथग्जनसभागता नाम द्रव्यमस्ति किं पुनः पृथग्जनत्वेन** आर्य- 170.19 (1b–8)
धर्मालाभस्वभावेन कल्पितेन प्रयोजनमिति वाक्यशेषः। पृथग्जनसभागतयैव

1 ति MSS. ཀྱང་. 2 °य MSS.

